# Shri Vamana Stotram

# શ્રીવામનસ્તોત્રમ્

## Document Information

Text title : Shri Vamana Stotram

File name : vAmanastotramshrIdharasvAmI.itx

Category : vishhnu, shrIdharasvAmI, dashAvatAra, stotra. aShTaka

Location : doc_vishhnu

Author : Shridharasvami

Description/comments : shrIdharasvAmI stotraratnAkara

Acknowledge-Permission: Upendra Shripad Dasare, https://shridharamrut.com

Latest update : November 8, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 13, 2022

*sanskritdocuments.org*

# શ્રીવામનસ્તોત્રમ્

(અનુષ્ટુપ્છન્દઃ)

પયોવ્રતસ્ય માહાત્મ્યં દર્શિતું યોઽભ્યવાતરત્ ।
વન્દે તં સચ્ચિદાનન્દં વામનં વિષ્ણુરૂપિણમ્ ॥ ૧॥

અહં ભક્તવશોસ્મ્યેતદ્દર્શિતું યોદિતેસ્સુતઃ ।
વન્દે તં સચ્ચિદાનન્દં વામનં વિષ્ણુરૂપિણમ્ ॥ ૨॥

પદ્ભ્યાં વ્યાપ્તં હિ ત્રૈલોક્યં માહાત્મ્યઁ સ્વં વ્યદર્શયત્ ।
વન્દે તં સચ્ચિદાનન્દં વામનં વિષ્ણુરૂપિણમ્ ॥ ૩॥

મહત્વેઽપિ મહાન્યદ્વદણીયાન્ યો હ્યણીયસઃ ।
વન્દે તં સચ્ચિદાનન્દં વામનં વિષ્ણુરૂપિણમ્ ॥ ૪॥

બલિર્યસ્ય કૃપાપાત્રઃ કૃત્વૈવાત્મનિવેદનમ્ ।
વન્દે તં સચ્ચિદાનન્દં વામનં વિષ્ણુરૂપિણમ્ ॥ ૫॥

દર્શિતં યેન સુપ્રીત્યા શ્રેષ્ઠમાત્મનિવેદનમ્ ।
વન્દે તં સચ્ચિદાનન્દં વામનં વિષ્ણુરૂપિણમ્ ॥ ૬॥

અદ્યાપિ દ્વારપાલો યો બલેર્ભક્તિવશઃ પ્રભુઃ ।
વન્દે તં સચ્ચિદાનન્દં વામનં વિષ્ણુરૂપિણમ્ ॥ ૭॥

નિર્ગુણે નિષ્ક્રિયો યો હિ સગુણસ્ય ક્રિયોઽપિ સન્ ।
વન્દે તં સચ્ચિદાનન્દં વામનં વિષ્ણુરૂપિણમ્ ॥ ૮॥

॥ ઇતિ શ્રીમત્ પરમહંસપરિવ્રાજકાચાર્ય સદ્ગુરૂ ભગવાન
શ્રીધરસ્વામીમહારાજવિરચિતં શ્રીવામનસ્તોત્રં સમ્પૂર્ણમ્ ॥

*Shri Vamana Stotram*

pdf was typeset on November 13, 2022

Please send corrections to *sanskrit@cheerful.com*